National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 185-187
© 2025 NJHSR
www.sanskritarticle.com

**अविनाशकुमारः,**
शोधच्छात्रः, ज्योतिष तथा वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**अविनाशकुमारः,**
शोधच्छात्रः, ज्योतिष तथा वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# साम्प्रतिककाले ज्योतिषशास्त्रस्य ज्योतिषतत्त्वप्रकाशग्रन्थस्य च प्रासङ्गिकता

**अविनाशकुमारः**

किन्नाम ज्योतिषमिति प्रश्ने तावदिदमुत्तरम् ज्योतीर्विद्भिः प्रतिपाद्यन्ते यस्मिन्नित्यर्थे **'अर्शऽच्'** इति सूत्रेण निष्पन्नतया ज्योतिषशब्दो ज्योतिः प्रतिपादकं साङ्केतितम्। यद्वा **'द्योतन्ते प्रकाशन्ते ग्रहनक्षत्रादयः अनेन'** इति **'द्युतेरिषन्नादेव जः'** इति उणादिनिष्पन्नोऽयं शब्दः। विदितमेव यद् वेदस्य हि षट्स्वङ्गेषु शास्त्रमिदं चक्षुस्त्वेन स्मर्यते। यतो हि भुवः पृथिव्यां ज्योतिः जागर्तीति ज्यौतिषम् । प्रकाशस्य पर्यायः सूर्यज्योतिः एव ज्योतिषस्य मूलाधारः वर्तते। लोकेऽस्य शास्त्रस्य वैशिष्ट्यं प्रतिपादयन् प्राचीनग्रन्थेषु वर्णितम्। माण्डव्यसंहितायां ज्यौतिषाध्ययनेन धर्मार्थादीनां प्राप्तिर्जायते यथा

**एवं विधस्य श्रुतिनेत्रशास्त्रस्वरूपभर्तुः खलु दर्शनं वै।**
**निहन्त्यशेषं कलुषं जनानां षडब्दजं धर्मसुखास्पदं स्यात्॥**[1]

महर्षिगर्गमतानुसारेण पुरुषार्थचतुष्टयाणां सिद्ध्यर्थं शास्त्रस्याध्ययनमावश्यकम्।

**ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम्।**
**ज्योतिर्ज्ञानन्तु यो वेद स याति परमां गतिम्॥**[2]

अपरिमिते गगनमण्डले यानि हि तेजोमयानि विम्बानि दृश्यन्ते तानि सर्वाण्येव समष्ट्या ज्योतिषशब्देन एवोच्यते। ब्रह्माण्डस्य विश्वस्य राष्ट्रस्य वा उद्भवविनाशादीनां कालज्ञानम् अस्माभिः ज्योतिषशास्त्रेणैव ज्ञायते। कालनिदर्शनात् अस्य शास्त्रस्य नेत्ररूपेण प्रतिष्ठा जाता। अस्य शास्त्रस्य त्रिस्कन्धात्मकत्वं भास्कराचार्येण सिद्धान्तशिरोमणौ प्रतिपादितम्। यथा-

**सिद्धान्त संहिता होरा चेति स्कन्धत्रयं मतम्।**
**वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमकल्मषम्॥**[3]

भारतीयसंस्कृतौ ज्ञानस्याधारभूतानां वेदानां नेत्रपदारूढं शास्त्रमिदं मानवानां कृते मार्गप्रदर्शकं कथन्न भवितुमर्हति ? वस्तुतः ज्योतिश्शास्त्रं वेदस्यैव नेत्रं नास्त्वपि तु समग्रमानवजीवनस्यापि नेत्रं वर्तते। गर्भाधानादारभ्य अन्त्येष्टिपर्यन्तानां सर्वेषां षोडशसंस्काराणां कालनिर्धारणम् अस्माभिः ज्योतिः-शास्त्रेण एव क्रियते। यात्रा क्रयविक्रयादीनां व्यावहारिकमुहूर्तानां विपुलतया विधानम् अनेन शास्त्रेण क्रियते। कदा का तिथिः ? कदा वा सूर्यचन्द्रग्रहणम् ? इत्यपि अनेनैव ज्ञायते। पशूनां लक्षणम्, वास्तुपरीक्षणम्, भूपरीक्षणम्, शल्यज्ञानम्, वास्तुद्वारा मेलापकज्ञानम्, काकिणी विचारः, रत्नचयनम्, तेषां शुभाशुभत्वमपि विधीयते। अत एव पाणिनीयशिक्षायां भगवता पाणिनिना 'ज्योतिषामयनं चक्षुः' इत्युक्त्वा अस्य शास्त्रस्य महत्त्वं प्रतिपादितम्। किं वा लोकेऽपि वयं पश्यामः यदाधुनिकजनाः भौतिकसाधनैः सम्पन्नाः सन्तोऽपि मानसिकरूपेण अशान्ताः व्यथितेन्द्रियाश्च सन्ति। शिक्षाजीविकोद्वाहा-वासप्रभृतिकाः विषयाः सर्वेषां मनसि भवत्येव, यतो हि आधुनिकयुगे नराः सर्वदा मङ्गलं वाञ्छन्ति। अतः मङ्गले प्रवृत्तिरमङ्गलन्निवृत्तिश्च सर्वत्र प्राणिनामवलोक्यते। अभिलषति च सततं समुन्नतमैश्वर्य-भाजमात्मानमवलोकयितुम् । ज्योतिः शास्त्रं नरकाङ्क्षां सर्वथा पूरयित्वा लोकं प्रति तदीयं भाविकालं सम्यग् बोधयति। अतः सर्वेषां हितकरत्वादिदं शास्त्रं परमोपादेयं शास्त्रम्। बालकानां कृते कीदृशी

शिक्षा ? कीदृग् व्यवसायः? कदावरोधः ? कश्चावरोधः ? कश्च निस्तारः ? सेवा वा समीचीनतरा भविष्यति। एतेषु विचारप्रवाहेषु प्रवहमानानां जनानां कृते शास्त्रमिदं नौरिव तिष्ठति। वस्तुतः स्वभावानुकूलमार्गे कृतश्रमः सार्थको भवति, विपरीत दिशि निरर्थको नैराश्यजनकश्च। अतः जीवने कदा साफल्यं कदा च वैफल्यम् एतत्सर्वं ज्ञात्वा प्रतिकूलप्रशमनार्थं मार्ग तथैव प्रदर्शयति यथा- घनान्धकारे स्थाने स्थितं वस्तुद्रव्यादिकं दीपसहाय्येन दृश्यते। कैश्चित् विद्वद्भिः प्रतिपादितम्

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्।**
**व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव॥**[4]

अत एव-

**न दैवं न पित्र्यं कर्मावसिध्येन्न यत्रास्ति देशे ननु ज्योतिषज्ञः।**
**न तारा न चारा नवानां ग्रहाणां न तिथ्यादयो वा यतस्तत्र बुद्धाः॥**[5]

आधुनिकविज्ञानस्य अनुदिनं विस्तारमवलोक्य केषाञ्चन मनसि विचारोऽयं समायाति यद् भवतु नाम ज्योतिषस्य प्रतिष्ठा पुरा महत्तरा परमिदानीम् अस्य कावश्यकता ? विज्ञानस्य प्रभावेनेदानीं मानवाः अन्तरिक्षे सञ्चरन्ति, भूस्थाः जनाः अन्तरिक्षयानेन पिण्डान्तरं गन्तुं क्षमाः सन्ति, विज्ञानस्याऽयम् उत्कर्षकालः परन्तु यदि सूक्ष्मेक्षिकया विचार्यते तदा सुस्पष्टं दृश्यते यत् यथा यथा विज्ञानस्योत्कर्षो जायते तथा तथा ज्योतिःशास्त्रस्यापि प्रसारो वृद्धिमुपैति। तत्कारणं यज्ज्योतिः शास्त्रं भौतिकसुखैषिणः सर्वासां समस्यानां समाधानं लौकिकजीवने लोकसाधनेष्वेव अन्वेषयति। यदि विज्ञानेनेदं ज्ञायते यत् अमुकदिने वृष्टिः, हिमपातः भूकम्पो वा भविष्यति तत्तु प्रायः न सिद्धयति परन्तु ज्योतिः शास्त्रस्य संहितास्कन्धद्वारा सम्यक्तया यदि एतेषां ज्ञानं क्रियते तत्सर्वं स्पष्टरूपेण दरीदृश्यते। कस्यामवस्थायां मेघाः सगर्भाः भवन्ति, कदा च सुवृष्टिं करिष्यन्ति, कियती वृष्टिर्भविष्यति इत्यपि पूर्णतया ज्ञातुं शक्यते। कृषिप्रधानदेशे वातचक्राणां ज्ञानम्, भूमौ जलान्वेषणम्, भूमिचयनम्, अनेनैव शास्त्रेण ज्ञायते। एवमेव प्रकारेण कदा हलप्रवहणम्, कस्मिन् मासे बीजवपनम्, कदा च सिञ्चनम् एतेषां लोकोपयोगिनां विषयाणां सविधिवर्णनं विपुलतया शास्त्रेऽस्मिन् लभ्यते। ज्योतिषं व्याधिनिरूपणेऽपि सहायकः। आयुर्वेदे ज्यौतिषस्य महती चर्चा वर्तते। सम्प्रति चिकित्साविज्ञानमतीव समुन्नतं परं शरीरं यदा योगग्रस्तं भवति तदानेकैः परीक्षणैः व्याधेः ज्ञानं कर्तुं शक्यते, परन्त्वनेन शास्त्रेण व्याधेरारम्भात् प्रागेव रोगज्ञानं भवितुमर्हति। शरीरस्थानां व्याधीनां निरूपणं नक्षत्रवशात् औषधिग्रहणेन तेषां रोगानां निदानमपि कथं भविष्यतीति वर्णितम्। यथा श्रावणीपर्वमुपलक्ष्य कुशदूर्वापामार्गस्नानानन्तरम् औषधिभिः शिरोमार्जनं क्रियते यन्मस्तिष्काय अपूर्वा शीतलतां प्रददाति। ज्योतिषरत्नकोषेऽपि औषधीयद्रव्यैः स्नाननिर्देशः वर्तते, प्रकारोऽयं बृहत्संहितायामपि वराहमिहिराचार्येण प्रतिपादितः। आयुर्वेदिक औषधी-नामुल्लेखोऽपि ज्योतिषरत्नकोषे विस्तृतरूपेण प्राप्यते। ज्योतिषशास्त्रे गर्भावस्थायां शिशोः विकासादारभ्य जन्मपर्यन्तं प्रतिक्षणं शरीरस्य मनसः बुद्धेर्वा कीदृशी अवस्था भवतीति पिरूपिता। तदनन्तरं कालपुरुष स्याङ्गानुसारं द्वादशराशिषु ग्रहाणां स्थितिवशाच्च सर्व शुभाशुभं ज्ञातुं शक्यते। अतः ज्योतिषशास्त्रं मानव जीवनस्य जीवनपद्धतेश्च नियामकं वर्तते। यतो हि कालत्रयाणां सम्यग्ज्ञानम् अनेन शास्त्रेण कर्तुं शक्यते । अत एव उक्तम् -

**वेदस्य चक्षुः किलशास्त्रमेतत् प्रधानताङ्गेषु ततोऽर्थ जाता।**
**अङ्गैः युतोऽन्यैः परिपूर्णमूर्तिः चक्षुर्विहीनः पुरुषो न किञ्चित्॥**[6]

निष्कर्षरूपेण इदं वक्तुं शक्यते यज्ज्योतिषं न केवलं परिमितं शास्त्रमपि तु लौकिकजीवनस्य नेत्ररूपं दर्पणमेव वर्तते यत् अस्मान् प्रगतिपथि नयति। अतः ज्योतिः शास्त्रम् आदिकालादेव अक्षुण्णरूपेण वरीवर्तीत्यत्र नास्ति सन्देहावसरः। अत एव आचार्यभास्करेणोक्तं स्वशिरमणौ-

**वेदास्तावत् यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।**
**शास्त्रादस्मात्कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्॥**[7]

वास्तुशास्त्रं ज्योतिषसंहितान्तर्गतमस्ति। ज्योतिर्विज्ञानगणितयोरपि वास्तुविद्याया सह घनिष्ठः सम्बन्धो वर्तते। आचार्यवराहमिहिरेण स्वकीयां बृहत्संहितायां वास्तुशास्त्रज्ञानं प्रतिपादितम्। इदं विज्ञानमतिप्राचीनं वैदिकमूलेन सम्बद्धं संहितोक्तं स्वतन्त्रशास्त्रमस्ति। वास्तुपुरुषमण्डलस्य विषये ये विचाराः अत्र प्रकटितास्ते वास्तुवीजानि सन्ति। वास्तुमण्डलोपरि विभिन्नानमधिपतिदेवानां प्रकल्पनेन शाकं सूर्यादिग्रहाणामपि कल्पना क्रियते। आधारस्वरूपं वास्तुमण्डलं भवति । तदुपरि देवानां निवासः भवति। कस्मिन् क्षेत्रे, नक्षत्रे, मासे, तिथौ च भवनकार्यारम्भो विधेयः निवेश्यवस्तुनः दिक् सामुख्यादिकं कीदृक् भवेत् ? कस्मिन् समये शिलान्यासो शुभो भवति एषां प्रश्नानां समाधानं ज्योतिषाशास्त्रे वर्तते। अत एव बास्तुत्रास्त्रं ज्योतिः शास्त्रस्याङ्गभूतम्। अथर्ववेदीयवास्तुसूक्तप्रमाणेन प्राचीन-वास्तुशास्त्रस्य वैशिष्ट्यं परिलक्ष्यते। स्थापत्यकलायाः विवेचने तथा प्राचीनतायाः दिग्दर्शनं प्राचीनग्रन्थावलोकनेन ज्ञायते। प्राचीन-वैदिकग्रन्थेषु गृहनिर्माणस्य प्रक्रियाया तथा च आवासीय व्यवस्थायाः विस्तृतं वर्णनं समुपलभ्यते। वैदिकपरम्परायां वास्तुशास्त्रम् ईदृशं शास्त्रं वर्तते यत्र मानवजीवने पुरुषार्थं प्राप्स्यर्थ जीवनस्य गतिविधिं च स्वतः प्रपूरयति, एवञ्च स्फूर्तम् अनेकान् नियमान् सिद्धान्तान् च प्रतिपादयति। एतेन अस्य शास्त्रस्य महत्त्वं मानवजीवने चास्योपयोगिता सिद्धयति।

जीवननिर्वाहाय सुव्यवस्थितगृहस्यावश्यकता, आवासस्तु समेषां जीवनामाधार भूतावश्यकता भवति। न केवलं मानवः वसितुमावासव्यवस्थायै गृहनिर्माणं करोत्यपि तु इतरप्राणिनोऽपि स्वस्व-गृहनिर्माणार्थम् आवासव्यवस्थां प्रकल्पयन्ति। वास्तुशास्त्रं गृहनिर्माणकं शास्त्रं विद्यते। भवननिर्माणात्पूर्व ग्रामस्य नगरस्य वा अनुकूलत्वमवश्यमेव विचारणीयम्। तत्रैव वास्तुमेलापकस्यापि आवश्यकता भवति। अमुके ग्रामे वा अमुके नगरे गृहनिर्माणेन

गृहस्वामिनः स्थितिः कीदृशी भविष्यतीति विचारणीयम्। अतः परं भूमिदिशाभूखण्डनक्षत्रयोगाश्च विचारणीयाः। वास्तुभूमेः चयनविमर्शे "पूर्वप्लवो वृद्धिकरो धनदश्चोत्तरप्लवः" इति सिद्धान्तः वास्तुशास्त्रे प्रसिद्धः। तथा च-

**दक्षिणे पश्चिमे चैव नैर्ऋते वायुकोणके।**
**एभिरुच्चैर्भवेत्स्थानो गजपृष्ठो विधीयते॥**
**गजपृष्ठे भवेद्वासः सलक्ष्मी धनवान् भवेत्।**
**आयुवृद्धिकरो नित्यं जायते नात्र संशयः॥**[8]

वाल्मीकीयरामायणेऽपि रामेण तदेवोक्तम्-

**प्रागुदक्प्रवणे देशे गुहा साधु भविष्यति।**
**पश्चाच्चैवोन्नता सौम्य निवातेयं भविष्यति॥**[9]

शास्त्रस्यास्य स्वतन्त्रमहत्त्वं प्रारम्भादेव विद्यते। वास्तुशास्त्रस्य प्रवर्तकक्रमः विस्तृतोऽस्ति। तद्यथा-

**भृगुरत्रिर्वसिष्ठश्च विश्वकर्मामयस्तथा।**
**नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः॥**
**ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च।**
**वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती॥**[10]

यस्मात्कारणाद् अस्य क्षेत्रमपि विशालो विद्यते। वस्तुतत्त्वस्य वास्तुशास्त्रस्य सर्वतो व्यापकदृष्टिः वर्तते। यथास्य शास्त्रस्य सामाजिकरीत्या एवं सर्वजनहिताय, सर्वजनसुखाय अप्युपयोगो मन्यते। आवश्यकता आविष्कारस्य जननी भवति। अस्तु देवालयनिवेशः, दुर्गनिवेशः, शिविरनिर्माणम्, गृहनिवेशः. वासगृहा-दीनां सर्वेषां निवेशस्य महत्यावश्यकता भवति। प्रस्तुतलघुशोधप्रबन्धे आवासीय व्यवस्थायामुपरि मया लेखनकार्यं कृतम्। मानवजीवने बाह्यसुखेषु भोजनवस्त्रावासाश्च मुख्यरूपेण आवश्यकता भवन्ति। मनुष्याणां कृते यावन्त्योऽप्यावश्यकताः सन्ति निर्दिष्टास्ता-स्वावश्यकतासु एतास्तिस्त्रो मुख्याः। आसु तिसृष्वावश्यकतास्वपि आद्ये द्वे आवश्यकते तदैव सम्पूर्णे भवतः यदाऽन्तिमा आवासजन्यावश्यकता पूर्णा भवति। यतः आवासस्थानं विना भोज्यवस्तूनां परिधानाञ्च रक्षणमसम्भवम्।

मनुष्याणां सहचराः पशवः वनस्पतयश्च सदैव भवन्ति। तैर्विना मानवजीवनमसमतभवम्। प्राचीनकालादारभ्य धेनवः, वृषभाः, अश्वाः, गजाः इत्यादयः पशवो मनुष्याणां कृते उपयोगिनः सन्ति। अनेन प्रकारेण यस्मिन् भूप्रदेशे वनस्पतीनां विकासो भवेत् तत्र वास्तुशास्त्रमाधारीकृत्य गृहनिर्माणं कर्तव्यम्।

मानवजीवने वेदवेदाङ्गोपाङ्गनां महत्त्वपूर्ण स्थानमस्ति। तत्र वैदिकसाहित्ये प्रतिपादितमस्ति तत्र 'इष्टप्राप्तयेऽनिष्टपरिहाराय लौकिकं चालौकिकमुपायं वेदयति यो शब्दराशिः स वेदः'। प्राचीनकालादारभ्य अद्यावधि चत्वारो वेदाः प्रसिद्धाः ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। एतेषां चतुर्णां वेदानां क्रमेण आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः स्थापत्यवेदश्चेति चत्वारो उपवेदाः वेदपरुषस्य षडङ्गेषु शब्दशास्त्रं, ज्योतिषशास्त्रं, निरुक्तं, कल्पः, शिक्षा, छन्दश्च वर्तते। बृहत्संहितायां वराहमिहिराचार्येण ज्योतिष-शास्त्रं होरासिद्धान्तसंहितारूपेण स्कन्धत्रयात्मकं कथितम्। होरायां जन्मकालीनग्रहाणां दशानुसारेण मानवहिताय शुभाशुभ-फलानां निरूपणं क्रियते।

सिद्धान्तस्कन्धे गणितीयसिद्धान्तानां सोपपत्तिकं विवेचनं भवति। संहितास्कन्धे च समष्टिरूपेण भूगर्भविज्ञान-वनस्पतिविज्ञान-वृष्टिविज्ञान-मुहूर्तविज्ञान वास्तुविज्ञानादिविषयाणां विस्तृतरूपेण विवेचनं भवति।

**संदर्भ सूची**


[1]माण्डव्यसंहिता।

[2]महर्षिः गर्गः।

[3]सिद्धान्तशिरोमणिः।

[4]सुभाषितरत्नभाण्डागारः।

[5]तत्रैव।

[6]तत्रैव।

[7]सिद्धान्तशिरोमणिः।

[8]श्रीमद्वाल्मीकिरामायणम् ।

[9]तत्रैव ।

[10]मत्स्यपुराणम्।